आस्ये प्रयत्नो यस्य वर्णस्य येन[1] वर्णेन सह स[2] समानजातीयं प्रति सवर्णसञ्ज्ञो भवति। चत्वार [3]आभ्यन्तराः प्रयत्नाः सवर्णसंज्ञायामाश्रीयन्ते––स्पृष्टता, ईषत्स्पृष्टता, संवृतता, विवृतता च इति। अ अ अ इति त्रयोऽकारा उदात्तानुदात्तस्वरिताः प्रत्येकं[4] सानुनासिका निरनुनासिकाश्च[5] ह्रस्वदीर्घप्लुतभेदाद् अष्टादश[6]धा भिद्यन्ते। तथा इवर्णः, तथा उवर्णः, तथा ऋवर्णः। ऌवर्णस्य दीर्घा न सन्ति, (आपि. शि. ६.४) [7]तं द्वादशभेदमाचक्षते। सन्ध्यक्षराणां ह्रस्वा न सन्ति, तान्यपि द्वादशप्रभेदानि। अन्तःस्था द्विप्रभेदाः, [8]रेफवर्जिता यवलाः सानुनासिका निरनुनासिकाश्च[9]। रेफोष्मणां सवर्णा न सन्ति। वर्ग्यो वर्ग्येण सवर्णः[10] (आपि. शि. ६.११/१३)। दण्डाग्रम्[11]। खट्वाग्रम्[12]।

आस्यग्रहणं किम्? कचटतपानां भिन्नस्थानानां[13] तुल्यप्रयत्नानां मा भूत्। किं [14]च स्यात्? तर्प्ता, तर्प्तुम् इत्यत्र 'झरो झरि सवर्णे' (८.४.६५/७१) इति पकारस्य तकारे[15] लोपः स्यात्। प्रयत्नग्रहणं किम्? इचुयशानां तुल्यस्थानानां भिन्नजातीयानां मा भूत्। किं च स्यात्? [16]अरुश्च्योतति इत्यत्र 'झरो झरि सवर्णे' (८.४.६५/७१) इति शकारस्य चकारे[17] लोपः स्यात्।

[३] ऋकारऌकारयोः सवर्णसञ्ज्ञा वक्तव्या। (म.भा. १.६२)

होऌकारः। होतृकारः। उभयोः ऋवर्णस्य ऌवर्णस्य[18] च आन्तरतमः सवर्णो दीर्घो नास्ति इति ऋकार एव दीर्घो भवति।

सवर्णप्रदेशाः–'अकः सवर्णे दीर्घः' (६.१.१०१/८५) इत्येवमादयः॥

## नाज्झलौ। (१०/१३)

अच् च हल् च, [19]अज्झलौ। तुल्यास्यप्रयत्नावपि अज्झलौ [20]परस्परं सवर्णसञ्ज्ञौ न भवतः। [21]अवर्णहकारौ–[22]दण्डहस्तः, [23]इवर्णशकारौ–दधि शीतम्, सवर्णदीर्घत्वं न भवति। वैपाशो मत्स्यः, आनडुहं चर्म इति 'यस्येति च' (६.४.१४८/३११) इति[24] लोपो न भवति[25]॥

---

1. येन वर्णेन नास्ति क.फ. 2. स नास्ति ड, स समानजातीयः ह. 3. आरभ्यन्तरा फ. 4. षड्विधा भवन्ति इत्यधिकम् ग. 5. इति षट्। एवं इत्यधिकम् ह. 6. भिदा फ. 7. स द्वादशप्रभेदः भवति अ. ग. 8. रेफवर्जाः ड, नास्ति अ. 9. इति फ. ह, इति भवन्ति इत्यधिकम् ग. 10. कस्य पुनः किं स्थानम्। अकुहविसर्जनीयानां कण्ठः। इचुयशानां तालु। ऋटुरषाणां मूर्धा। उपूपध्मानीयानामोष्ठौ। ऌतुलसानां दन्ताः। एदैतोः कण्ठतालु। ओदौतोः कण्ठोष्ठम्। वकारस्य दन्तोष्ठम्। जिह्वामूलीयस्य जिह्वामूलम्। हकारं पञ्चमैर्युक्तमन्तःस्थाभिश्च संयुतम्। औरस्यं तद्विजानीयात् कण्ठ्यमाहुरसंयुतम्॥ अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा। जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च॥ कस्य पुनः कः प्रयत्नः। स्पृष्टं प्रयतनं स्पर्शानामीषत् स्पृष्टमन्तःस्थानाम्। विवृतमूष्मणां स्वराणां च। संवृतं हकारस्य। किं च–अचः स्वराः, हल् व्यञ्जनम् इत्येतानि सन्ध्यक्षराणि। कादयो मावसानाः स्पर्शाः। यरलवा अन्तःस्थाः। शषसहा ऊष्माणः। ⌣क इति जिह्वामूलीयः। ⌣प इति उपध्मानीयः। ं इत्यनुस्वारः। : इति विसर्जनीयः ग. 11. इति फ, नास्ति ह. 12. क्षपाग्रम् ब. ड, नास्ति क. ह, क्षुपाग्रम् ई. 13. तुल्यप्रयत्नानां भिन्नस्थानानां ड. ह. 14. तु ड. 15. परे ग. फ. ह, परतः अ. 16. अहः व. 17. चकारे परे अ, चकारे परतः फ. ह. 18. ऌकारस्य ड, अन्तरतमः सवर्णस्य दीर्घो न संभवति इति ऋकार एव उभयोः भवति क. ग. फ. ह. 19. अज्झलौ नास्ति फ. 20. परस्परं नास्ति क. 21. अवर्णहकारयोः अ. 22. दण्डहस्तम् ह. 23. इवर्णशकारयोः अ. 24. इति नास्ति फ. 25. इति इत्यधिकम् ह.